International Journal of Sanskrit Research 2019; 5(5): 201-205

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(5): 201-205
© 2019 IJSR
www.anantaajournal.com
Received: 18-07-2019
Accepted: 21-08-2019

**डॉ0 दीपाली जैन**
कन्या गुरूकुल महाविद्यालय, गुरूकुल कांगड़ी वि0वि0, हरिद्वार, उत्तराखण्ड, भारत।

**डॉ0 वीना विश्नोई शर्मा**
कन्या गुरूकुल महाविद्यालय, गुरूकुल कांगड़ी वि0वि0, हरिद्वार, उत्तराखण्ड, भारत।

**Corresponding Author:**
**डॉ0 दीपाली जैन**
कन्या गुरूकुल महाविद्यालय, गुरूकुल कांगड़ी वि0वि0, हरिद्वार, उत्तराखण्ड, भारत।

# वैदिकग्रन्थेषु संस्कृतवांगमये च नदीनां जलप्रबन्धनम्

**डॉ० दीपाली जैन, डॉ० वीना विश्नोई शर्मा**

**प्रस्तावना**

उपनिषत्सु मधुरूपजलस्य कल्पना कृता। आदित्योपमां मधुना सह विधीयता ऋषिणा मधुविज्ञानरूपेण जलविज्ञानमेवोपदिष्टम्। 'आदित्यो वै देवानां मधु' इत्यक्तम्। द्युलोकः आश्रमः अन्तरिक्षं मधुकोशः रश्मयः मधुमक्षिकाः पूर्वरश्मयः पूर्वदिग्वर्तिछिद्रा, ऋग्मधुकरः पुष्पं च सोमादि अमृतमेव जलम्। एतोनोपमानेन ब्रह्मरूपजलस्य जीवलोकोद्देश्येन प्राप्तेः भौतिकविधानमेव प्रतिपाद्यते, येन आहृतं रसायनरूपजलं मधुवत्स्वादुकरं पुष्टिकरं स्वास्थ्यकरं च भवति प्राणिनां कृते। आदित्येन र्वतः रश्मिभिः रसरूपजलं गृहीत्वा सदाऽन्तरिक्षे निषेव्यते तर्हि तज्जलगर्भमन्तरिक्षमेव मेघरूपो भवति।२ मेघे च रासायनिकक्रियाभिः सूर्यतापेन शोध्यमानं सूक्ष्मं जलं पार्थिवविलेयकाणान् पृथक्कृत्य निर्मलं शुद्धं मधुवत्साररूपं जलं स्थाप्यते। मध्वत्रोपलाक्षणिकम्। शुद्धं जलं हि मधुस्वादयुक्तं भवति। एतस्मादेव निरुक्ते जलनाम मध्विति अस्य निर्वचनं मेघोदरसंस्थितं जलमित्यर्थे कृतम्। मधुवत्स्वादुवत्त्वात्, जनैीतिशयमान्यत्वान्मननीयत्वाद्वा जलं मध्वित्युच्यते।२

जलोत्पत्तेः उक्तभैतिकसिद्धान्तो वैदिकसंहितासु रासायनिकपद्धत्या वर्षाविज्ञानरूपेण सविस्तरं निर्दिशतम् । आदित्येन भौमजलस्य ग्रहणं, वायुना तस्य अन्तरिक्षे मेघरूपेणावधारणं जलवाष्पनिर्माणं,अन्तरिक्षे तस्य शीतीकरणं हिमीकरणं च पुनः कालक्रमेण आदित्योष्मणाऽन्तरिक्षस्थज्योतिषा च इन्द्रमरुदादिवायूनां सहाय्येन हिमीभूतमेघस्थस्य जलस्य हननं द्रवीकरणं च, वर्षारूपेण च द्रवात्मकजलस्य प्राप्तिः इति सर्वं द्रव्यरूपजलोत्पत्तिक्रमः। एतद्वर्षाजलं नद्यादिमार्गेण समुद्रमभिगच्छति भूमिछिद्रेभ्यः भूमिगतस्थसलेषु कूपजलाशयगर्तादिषु च गच्छति । एतद्विज्ञानं जलभेदानां सम्बन्धविचारे विचारयिष्यते।

जलोत्पत्तेः उक्तभैतिकसिद्धान्तो वैदिकसंहितासु रासायनिकपद्धत्या वर्षाविज्ञानरूपेण सविस्तरं निर्दिशतम् । आदित्येन भौमजलस्य ग्रहणं, वायुना तस्य अन्तरिक्षे मेघरूपेणावधारणं जलवाष्पनिर्माणं,अन्तरिक्षे तस्य शीतीकरणं हिमीकरणं च पुनः कालक्रमेण आदित्योष्मणाऽन्तरिक्षस्थज्योतिषा च इन्द्रमरुदादिवायूनां सहाय्येन हिमीभूतमेघस्थस्य जलस्य हननं द्रवीकरणं च, वर्षारूपेण च द्रवात्मकजलस्य प्राप्तिः इति सर्वं द्रव्यरूपजलोत्पत्तिक्रमः। एतद्वर्षाजलं नद्यादिमार्गेण समुद्रमभिगच्छति भूमिछिद्रेभ्यः भूमिगतस्थसलेषु कूपजलाशयगर्तादिषु च गच्छति । एतद्विज्ञानं जलभेदानां सम्बन्धविचारे विचारयिष्यते।

मानवजीवने जलानामतिमहत्वमस्ति। ऋते जलाद् भूमौ कोऽपि प्राणिनः जीवनमसंभवोऽस्त्ति। वैदिककालाद् अद्यावधि 'जल एव जीवनमस्ति' इति मत्वा जलं जीवनस्य कृते एतादृशं तत्वं मन्यते यं विना जीवनसम्भावना भवितुं नार्हति। जलमहत्वं प्रतिपादयन् महानारायणोपनिषदि कथ्यते-

**आपो वा इदाः सर्वम् विश्वभूतान्यापाः।**
**प्रागावापः पासव आपोन्नमपोमृतम् आपः।।**

अर्थात् जलैव ब्रह्माण्ड, तस्य भूत, भविष्यवर्तमानश्चास्ति। खाद्यपदार्थजीवं च जलान्येन्व सन्ति, इतस्ततः प्रकीर्णा सर्वा वनस्पतिः जलमेवास्ति, जल जीवनस्य कृते अमृततुल्यमस्ति।१

वैदिककाले जलस्य कृते वर्षायामेव जनाः आश्रिताः आसन्। ऋग्वेदे इन्द्रं जलदेवता कथ्यते, यतोहि इन्द एव वज्रेण मेघेषु प्रहारयति ततः मेघाः जलवर्षा कुर्वन्ति। पर्वतेषु जलप्रवहीणात् अनेका नद्यः प्रवहन्ति।२ ऋग्वेदस्य एकस्मिन् मन्त्रे३ द्विविधप्राप्तजलस्य वर्णनमस्ति- (१) खनित्रिमा अर्थात् उत्खननेन प्राप्तजलम्।४ (२) स्वयंजा५- नद्यादिभिः प्रकृत्योवन्नजलम्। वर्षा जलातिरिक्तं कूपतडागकुल्यादिभिश्च जलं प्राप्यते स्म।६

अथर्ववेदे वर्षाजलस्य वर्णनं प्राप्यते स्म।१ नदीभिश्चापि जलानि प्राप्यन्ते स्म।२ कूपतड़ागवाप्यादिनामाप्यपि अथर्ववेदे जलानि प्राप्यन्ते।३

मनुस्मृत्यानुसारं कूपतड़ागवाप्यादयः जलस्य मुख्यसाधना आसन्। एतेषां निर्माणं साज्ञः परमकर्तव्यमासीत्।४

रामायणकाले जलस्य मुख्यस्रोतांसि नद्यः जलाशयाः सरोवराः वाप्याश्चासन्५ वर्षामपि जलस्य मुख्यस्रोतं मन्यते स्म, यतोहि वर्षाजलादेव नदीषु सरोवरादिषु जलमायाति स्म।६

**तमसा**-वाल्मीकिरामायणे सर्वप्रथमं जलदर्शनं अस्माकं नदीरूपे भवन्ति। तमसातटे वाल्मीकिः स्वशिष्यं कथयति-'भरद्वाज ! पश्य अत्र स्नानस्थलमति रमणीयमस्ति, अस्मिन् पंकस्य किंचदपि स्थानं नास्ति। पुरुषस्य मनवदेवात्र निर्मलजलमस्ति। अहं तमसायाः अस्मिन् श्रेष्ठजले स्नानयिष्यामि७ ततः महर्षिः तमसाजले निमज्जितवान् तथा भरद्वाजः नदीजलात् घटंपरिपूर्य महर्षेः अनुगमनमकरोत्।'८

**वनगमनकाले सुमन्त्रः** घोटकान् तमसाजलं पायितवान् तथा तस्मान् जलात् स्नानितवान्१ श्रीरामोऽपि निशायां तमसानदीजलं पीतवान्।२
सरयू-अयोध्यानगरीसरयूनदीतटे स्थिता अस्ति, या ब्रह्मसरतः प्रवहति, ब्रह्मसरतः आगमनत्वेन अस्याः संज्ञा सरयू अभवत्।३ (अयोध्यानगरी) सरयोः जलमतिमधुरस्ति मन्ये ईक्षुरसतुल्यमस्ति।४
वनगमनकाले विश्वामित्रः रामं निगदति-'वत्स राम ! इदानीं सरयूजलात् आचमयतु। कार्येऽस्मिनावश्यके मा विलम्बयतु।५

**गंगा**-गंगा सर्वासु नदीषु श्रेष्ठतमा मन्यते।६ इयं जनाः 'त्रिपथगा'७ अपि वदन्ति। इयं हिमवतः ज्येष्ठा पुत्री अस्ति।८श्रीरामलक्ष्मणौ मुनिविश्वामित्रादयश्च पवित्रनदीगंगायाः दर्शनमकुर्वन्। हंससारसावृत्तायां तस्यां गंगायां ते सर्वे निमज्जितवन्तः तथा स्वपूर्वजान् देवान् च तर्पितवन्तः।९
स्वपूर्वजमुक्तये भगीरथः स्वर्गात् गंगा भूमौ आनीतवान्।१० गंगां भूतलेऽवलोक्य भूतलवासिनः ऋर्षिगन्धर्वाश्च इदं विचिन्त्य यत् भगवतः शंकरस्य शिरोभागतः पतितं जलमिदं अतिपवित्रमस्ति, तस्मिप् आचमिष्यन्ति। सर्वे गंगायां निमज्जनंविधाय पापहीनाः अभवन्।११ ततः गंगायाः तमोत्तमजलं
सगरपुत्राणां भस्मराशिं आप्लावितं अकरोत् तथा ते सर्वे राजकुमाराः निस्पापं भूत्वा स्वर्गं गतवन्तः।१ ततः ब्रह्मा भगीरथं निगदितवान्- 'सम्प्रि त्वं गंगायाः जलात् स्वसर्वेषां पितृणां तर्पणं कुरु तथा एवं आत्मना स्वपूर्वजैःश्च कृतां प्रतिज्ञां पूरय ।'२ गंगायाः जलं नित्यस्नानयोग्यमस्ति त्वं आत्मन अपि अस्यां निमज्जतु तथा पवित्रंभूत्वा पुण्यफलं प्राप।३ गंगां जाह्नवी४ तथा भागीरथी अपि कथ्यते।५ गंगा शीतलजलेन परिपूर्णा सरोवरैश्च व्याप्ता, रमणीया चासीत्। बहवः महर्षयः तस्याः जलं प्रयुज्यन्ते स्म,६समये-समये अप्सरारपि देवलोकतः आगत्य तस्याः जलं सेवयन्ति स्म। गंगा सर्वेषां कल्याणकर्त्री अस्ति।७देवदानवगन्धर्वकिन्नराश्च तस्याः शिवस्वरूपायाः भागीरथ्याः शोभां वर्धयन्ति स्म। नागगन्धर्वाणां च पत्न्यः तस्याः जलं सेविष्यन्ति स्म।८ श्रीरामः ऋंगवेरपुरे केवलेन लक्ष्मणेन आनीतं गंगाजलमेव सेवितवान्।९

**यमुना**-गंगायमुने संगमं निकषा एव भरद्वालमुनेराश्रमम् आसीत्।१०मुनिभरद्वाजं प्रणम्य ते रामसीतालक्ष्मणाश्च यमुनातटे आगतवन्तः। यमुनायाः जलं अतिवेगेन प्रवाहितम -ऽभवत्।११यमुनाप्रवाहमध्ये आगते सति सीता तां गंगां प्रणमति स्म, तथा आत्मनं भर्ताऽभ्यूदये

स्वस्ति देवि तरामि त्वां पारयेन्मे पतिव्रतम्।। तदेव २/५५/१६

प्रार्थयति स्म।१ यमुनायाः पश्चिमतटः विचित्रपांशुजलराशिभिश्च सुशोभितः हंससारसैश्च व्याप्तोऽऽसीत्।२यमुनातटे रात्रिव्यतीत्य ते यमुनाजले निमज्जितवन्तः चित्रकूटस्य कृते प्रस्थितवन्तः।३

**शोणभद्रनदी**-इयं रमणीया सोननदी दक्षिण-पश्चिमदिग्भागे प्रवहन् मगधदेशात् आगतवती, अतो इयं 'सुमागधी' नाम्ना प्रसिद्धा अस्ति। इयं पंचपर्वतेभ्यः मध्यमालावत् स्थिता अस्ति। अस्याः उभयतटेषु रमणीयक्षेत्राणि सन्ति, तानि सस्यमालाभिः अर्थात् हरितक्षेत्रैः सुशोभिताः आसन्।४ इयं अतिगम्भीरजलेन परिपूर्णा अस्ति।५

**मन्दाकिनी**-मन्दाकिनीनदी चित्रकूटपर्वतात् प्रवहति स्म, सा नदी हंससारसैश्च सुशोभिता आसीत्, अनेकविधानि पुष्पाणि तस्याः शोभां वर्धयन्ति स्म।६ जटावल्कलवस्त्रैः युकाताः अनेके महर्षयः सिद्धसन्ताश्च अस्यां नद्यां प्रतिदिनं निमज्जन्ति स्म । रामोऽपि सीतां जलेऽस्मिन् स्नानार्थं वदति ।७ अस्याः जले निमज्जेन मनुष्याः ग्लानिरहिताः सुखानुभूतिश्च कुर्वन्ति।८श्रीरामः अस्याः जलादेव आत्मनः मृतपितरं महाराजदशरथं जलांजलिं अददत्। चित्रकूटपर्वते त्रयोऽपि मन्दाकिनीजलस्येव उपयोगः कुर्वन्ति स्म।९

**गोदावरी**-गोदावरीनदी पंचनदीं निकषा प्रवहति स्म, तस्यां हंसकारण्डवसदृशाः अनेके खगाः विचरन्ति स्म, तथ अनेके मृगाः जलं पिवन्ति स्म। पर्णशालां निर्माय लक्ष्मणः गादावर्यां निमज्जितवान्।१ पंचवट्यां निवासे सति श्रीरामसीतालक्ष्मणाश्च गादावीनद्याः जलस्येव उपभोज्यन्ति स्म।२

**अन्या प्रमुखा नद्यः**-रामायणकालीनासु अन्यासु प्रमुखासु नद्यासु इक्षुमती३ वेदश्रुतिः४ गेमती५ स्यन्दिका६ तुंगभद्रा७सुदामानदी ह्लादिनीनदी शतुद्रूनदी शिलानदी सरस्वती कुलिंगा
कुटिकोष्टिका उत्तानिकानदी कुटिकानदी कपीवती नदी शैलोदा नद्यादयः प्रमुखा आसन्।८ दशरथराज्ये अनेकाः नद्यः प्रवाहिताः आसन्।९सुमन्तं वनाद् पुनीरगमनकाले अनेकाः नद्यः प्राप्तासन्।१० किष्किन्धापुर्यां लक्ष्मणः निर्मलजलपरिपूर्णा अनेका पर्वतीय नद्यः अवलोकितवान्।११ श्रीरामस्य राज्याभिषेकसमये पंचसतनदीनां जलं आनयनार्थं दशरथः उक्तवान्।१२

नद्यः तस्मिन् समये तत्र प्रवहन्ति स्म, याः जलेन सदैव आप्लाविता आसन्। अनेन सुगन्धितजलेनैव श्रीरामस्य राज्याभिषेकोऽभवत्।१

**नदीनां जलसंरक्षणोपायाः**-पृथिव्यां नद्यः निर्झराः प्रस्रवणाः जलाशयाश्च भूस्तरीयजलस्रोतांसि वर्तन्ते। तत्र नद्यः निर्झराः प्रस्रवणाश्च जलप्रवाहवत्वात्स्रोतांसि भवन्ति। जलाशयाः भूगर्भीयजलेन च सदैव अन्तः प्रवाहवन्तः भवन्ति। निर्झराः प्रस्रवणाः प्रायः पर्वतीयप्रदेशे एव प्राप्यन्ते। किन्तु क्षेत्रीयप्रदेशेषु नद्यः जलाशयाश्च प्रमुखजलस्रोतांसि भवन्ति। नद्यः समस्तपृथिव्यां प्रजापतेः नाडीभूताः प्रसृताः सन्ति इति पौराणिकमतम्।२ पद्मपुराणे नद्यः विश्वस्य मातरः उक्ताः३ यस्याभिप्रायोऽयमेव मन्तव्यः यत् प्राणिनां जलोपलब्धेः सर्वदिशिकसर्वकालिकस्रोतस्तया नद्यः विश्वं पालयन्ति। नद्यः प्रायः पर्वतप्रस्रवाः भवन्ति। पुराणेषु द्विपानां कुलपर्वतेभ्यः उद्गताः महानद्यः४ अन्याच्च नद्यः क्षुद्रनद्यश्च पथ्यापथ्यत्वम् उपवर्णितम्। तेषां सर्वाषां नामानि विस्तारश्च यथाप्रमाणमुक्तम्। वैदिकवांगमये एकविंशतिनदीनां वर्णनं प्राप्यते । तासु सिन्धुसरस्वतीनद्यौ श्रेष्ठे मते। पौराणिकमतानुसारेण स्वादुजलं परितः प्रजाः तिष्ठन्ते-

**स्वादूदकस्य परितः दृश्यते लोकसेस्थितः।। इति**

स्वादूदकस्य विस्तारः सहस्रयोजनात्मकमित्यनुमितम्। आधुनिकाध्ययनैः भारतीयनदीनां सामान्यप्रवाहः विचार्य समग्रजलसम्पत् १६.७ कोटि हेक्टेयरमीटराणि भवेदित्यनुमीयते। मत्स्यपुराणे सरित्सरसां स्रोतांसि विस्तारेण वर्णितानि। भारतवर्षे महेन्द्रमलयसह्यशक्तिमान्, ऋक्षवान् विन्ध्यः पारियात्रश्चैते सप्तकुलपर्वग्ताः उक्ताः। तत्र कैलासपादाद् उम्पन्नं शुभशीतलजलस्य स्रोतो विद्यते, यन्मन्दरागयुक्तं वर्तते। तस्मादेव स्रोतसः दिव्यनदी मन्दाकिनी उद्गता। तस्मिन्नेव परिक्षेत्रे

सर्वधातुयमन्वितः दिव्यः सुवेलपर्वतश्रेणीमभिचन्द्रप्रभनाम पर्वतः स्थितः।१तत्समीपेऽच्छोदसरोऽस्ति, यस्मादच्छोदिकेत्याख्या नदी उद्गता-

**तत्समीपे सरो दिव्यमच्छोदं नाम विश्रुतम्।**
**तस्मात्प्रभवते दिव्या नदी ह्यच्छोदिका शुभा।२**

सूर्यवल्लोहितवर्णात् हेमपर्वतात् लौहित्याख्यः विशालनदः प्रभूतः। वैद्युतगिरेः सरयूः नदी अरुणपर्वताच्छैलोदरः। ततश्च शैलोदका नदी शिवपर्वतस्य पादे कांचनबरलुकामयः सुरम्यो बिन्दुसरः प्रतिष्ठते, यत्र गंगोद्देश्येन राजर्षिः भगीरथः बालुकापर्यन्तम् अवसत्। सर्वप्रथमं गंगा तत्रैव प्रतिष्ठिता । तत्स्थानं सोमपात् इति नाम्ना प्रसिद्धम्। ततः गंगा सप्तस्रोतस्सु विभाजिता। तस्या तिस्रो धाराः प्राच्यां तिस्रश्च प्रतीच्यां सप्तमी च मुख्या धारा भागीरथी इति ख्याता । पूर्वधाराः नलिनी ह्लादिनी पावनी चेति प्रतीच्यां च सीता, चक्षुः सिन्धुश्चेति ख्याता। भागीरथी हिमवन्तं द्विधा विभज्य समस्तानपि मध्यागतान् प्रदेशान् प्लावयन्ति दक्षिणोदधौ प्रविशति।
हेमकूटपर्वतात् ज्योतिष्मती सरस्वती च निर्गच्छतः। निषधपर्वते विष्णुपादो नाम सरः मेरुपार्श्वात् चन्द्रप्रभाख्यो नदः जम्बूनदद्याः जम्बूनदः पुण्डरीकपयोदात्

नीलहृदः, कुरुप्रदेशे च समुद्रवद्विशालाः द्वादश जलाशयाः वर्तन्ते येभ्यः शान्ती माध्वी च सरितौ उद्गते।३

**न तत्र मेघा वर्षप्ति शीताष्णं च न तद्विधम्।**

सहस्रा अपि नद्यादयो नाम्नापि न गणयितुंक्यन्ते। एतासु काचिदुत्तानतोया काविद्गम्भीरा काश्चिच्च अगाधजलाः सन्ति। काश्चिद्वेगवत्योऽपराः मन्दवेगाः अन्याश्च मध्यमवेगाः सन्ति। विपाशाशुतुद्रिश्च अश्ववद्वेगवत्यौ। लघु स्रोतसां जलमुत्तानं भवति, यस्मिन् रथस्यार्धचक्रं यावज्जलं भवति।४ गभीरजलासु नदीषु परिवहनं सुकरं भवति।
कूर्मपुराणे मेरुपर्वतस्य चतुर्दिग्भागेषु अरुणोदमहाभद्रासितोदमानस इत्येतानि चत्वारि सरांसि भवन्ति। भूमिगतं जलं सर्वेष्वेव जलप्रवणेषु निर्जलेषु च प्रदेशेषु प्रमुखं पेयजलस्रोतो भवति। वर्षा मृत्स्वरूपं नदीजलाशयानां स्थितिः, भूगर्भीयशैलाः इत्यादयः भूमिगतजलस्य दशां निश्चितां कुर्वन्ति। भूगर्भे वर्षाजलं भूपृष्ठीयजलं च विविधमार्गेभ्यः भाण्डारी क्रियते। तस्य स्तरे आवर्तपरिवर्तनं भवति। वर्षाकाले भौमजलस्तरम् उच्चतरं भवति, अतः भूगर्भीयजलभाण्डारेषु अतिरिक्तजलपूर्तिः जायते। वर्षातिरिक्तऋतुषु लोकैः उपयोगाय संदुह्यमानं भूगर्भीयजलं वर्षाऋतौ पुनः पूर्यते। प्राचीनकालादेव सर्वाधिकं भूमिगतजलमेवोपभुज्यते। वर्षाहिमद्रावितजलयोः भूपृष्ठीसजलस्य संतुलनं भूमिगतेनैव जलेन क्रियते। असीमितमपि भूगर्भीयजलं पुनःपूरणपद्धत्या नैसर्गिकरूपेण अविच्छन्नस्रोतस्त्वेन स्वीक्रियते।
मानवैः उपयोगात् विमोचनेन, मलाशयानां जलस्रावेण, नगरेषु अपवाहकुल्याभिः, मलिनसामग्रीभिः स्थलपूरेण, कृषियोग्यभूमिषु प्रयुज्यमानरासायनिकोर्वकानां अनुप्रयुक्तजलेन प्रदूषितं जलमनेकशैलेभ्यः मूल्लवणतां खनिजधातूनां पोषेगुणांश्चाहृत्य निर्मलं पुष्टिदं भूत्वा भूगर्भं भाण्डारी भवति।
भूमिगतजलसंदोहनार्थं भूगर्भीयजलभण्डाराणां ज्ञानमावश्यकम्। अतः भूमेः लक्षणान् दृष्ट्वा अन्तःस्थजलस्य परिमाणं गुणवत्तां गाम्भीर्यं चानुमाय तत्प्राप्तौ प्रवृत्तिः प्राचीनकालादेव दृश्यते। अथर्ववेदे१ तैत्तिरीयारण्यके२बृहत्संहितायां च बाल्मीकिचिन्हैः अन्यैश्च चिन्हैः उक्तविषयकाः उल्लेखाः प्राप्यन्ते।
बृहत्संहितायां दकार्गलाध्याये भूमिगतजलस्रोतःज्ञानस्य विविधाः आधाराः सविस्तरं विवेचिताः। पृथिव्यां जलस्रोतांसि शिरा इत्युक्ताः। इन्द्राग्नियमवरुणपित्रृतिवायुचन्द्रमाशंकर इत्येते प्रदक्षिणक्रमेण पूर्वादि अष्टदिग्भागानां स्वामिनः सन्ति। तदनुसारमेव पृथिव्या अष्टौ प्रमुखाः शिराः ऐन्द्री आग्नेयी याम्या नैऋती वारुणी चान्द्री शैबी चति उच्यन्ते। नवमी च महाशिरा पृथिव्याः केन्द्रे स्थितास्ति, या पातालात् ऋजुमार्गेणोर्ध्वं गच्छति। सा शुभा भवति।

**जलस्रोतसो दृशा त्रिधा निर्जलप्रदेशविभागः कृतः-**
(१) मरुप्रदेशः (२) सामान्यप्रदेशः (३) अनूपप्रदेशः ।
भूगर्भीयजलानुसन्धाने त्रिष्वपि प्रदेशेषु पृथक्-पृथक् लक्षणानि दृश्यन्ते। अनूपप्रदेशेषु जलस्तरमुच्चं भवति । अधिकजलराशिश्च भूगर्भे भाण्डारितो भवति। अतः एतेषु प्रदेशेषु अर्धपुरुषे एव खननेन जलं प्राप्यते। एते प्रदेशाः प्रायः नदीबहुलाः वर्षाबहुलाश्च भवन्ति। सामान्यप्रदेशेषु नातिगभीरे भूगर्भे उत्खननेन जलं प्राप्यते। सामान्यतः निर्जलप्रदेशेषु सार्धैकपुरुषतश्चःपंच पुरुषैर्यावत् जलप्राप्तिः भवति। पंचपुरुषेभ्योऽप्यधिकं क्वचिज्जलं भवति। सामान्यप्रदेशात् द्विगुणे भूगर्भे प्रायः मरुभूमौ जलं प्राप्यते। भूगर्भीयजलस्रोतांसि बृहत्संहितानुसारेण निम्नोद्धृतलक्षणैः ज्ञेयानि-
निर्जले देशे वेतसो हस्तत्रयेण प्रतीच्यां सार्धैकपुरुषेण (प्रायः ११-६ फीटेषु) जलं भवेदिति निश्चितम् । लक्षणं चेदे यदर्धपुरुषे पीतवर्णा मण्डूकः पीता मृद् वा भवेत् । पाषाणः पुटभेदकश्च पाषणमधश्च तोयं भवति-

**यदि वेतसोऽम्बुरहिते देशे हस्तैस्त्रिभिस्ततः पश्चात्।**
**सार्धेपुरुषे तोयं वहति शिरा पश्चिमा तत्र।।**
**चिन्हमपि चार्धपुरुषे मण्डूकः पाण्डुरोऽथ मृत्पीतर।**
**पुटभेदकश्च तस्मिन् पाषाणो भवति तोयमधः।।१**

जमबुवृक्षादुत्तरस्मिन् त्रिहस्तैः पुरुषद्वयादधः (१५ फीटेषु) जलस्थितिर्भवेत्। सार्धसप्तफीदेभ्येभ्योऽधः लौहगन्धा मृत् ततः धूसर अथ पीता मृत्ततोऽधः मण्डूकः इति लक्षणानि ज्ञेयानि ।

**जम्व्वाश्चोदगन्धस्तैस्त्रिभिः शिराधो नीद्वये पुर्वा।**
**मृल्लोहगन्धिका पाण्डुरा च पुरुषेऽत्र मण्डूकः।।२**

जम्बूवृक्षस्य प्राग् चेत् समीपस्थो वल्मीको भवेत् तर्हि तस्मात् दक्षिणपार्श्वे पुरुषयद्वयादधः स्वादुजलभाण्डारो भवेत्। अर्धपुरुषपर्यन्तं (३-५ फीटेषु) चेन्मत्स्यः, कपोतसदृशवर्णः पाषाणो नीलवर्णा च मृद्भवेत् तर्हि तत्र दीर्घकालस्थायी प्रचुरं जलस्रोतो ज्ञेयम्-

**जम्बूवृक्षस्य प्राग्वाल्मीको यदि भवेत्तत्समीपस्थः।**
**तस्माद्दक्षिणपार्श्वे सलिलं पुरुषद्वये स्वादु ।।**
**अर्धपुरुषे च मत्स्यः पारावतसन्निभश्च पाषाणः।**
**मृद्भवति चात्र नीला दीर्घकालं बहुतायम्।।१**

सारस्वते जम्बूवृक्षस्य दक्षिणपार्श्वे त्रिहस्तैः पार्श्ववर्तिप्रदेशे जलम् उक्तं अन्यबृहत्संहितावदेव-

**जम्बूवृक्षात्पूर्वभागे वल्मीको यदि दृश्यते।**
**तरोर्दक्षिणतो हस्तात्त्रींस्त्यक्त्वाऽधो जलं वदेत्।।**
**नरद्वयेऽर्धपुरुषे मत्स्योऽश्मा पक्षिसन्निभः।**
**ततोऽधिका मृत्तिका नीला ततो मृष्टं जलं वदेत्।।**

उदुम्बरवृक्षात्त्रिहस्तैः पुरुषद्वयादधः जलं भवेत्। अर्धे पुरुषे श्वेतः सर्पः कृष्णमृत्तिका ततोऽधः स्वादुजला शिरा भवति। अर्जनवृक्षादुत्तरस्मिन् पार्श्वे वाल्मीको भवेत् तर्हि अर्जुनात्त्रिभिः हस्तैः सार्धत्रिभ्यः पुरुषोभ्योऽधः जलं भवति। अर्धपुरुषे श्वेता गोधा पुरुषप्रमाणे च धूसरा मृत् ततश्च कृष्णा मृत्, ततः सिता च सिकतामयी मृत् भवेत् तर्हि असीमितं जलं विन्देत्-

**पश्चाादुदुम्बरस्य त्रिभिरेव करैर्नरद्वये सार्धे।**
**पुरुषे सितोऽहिरश्मसंजनोपमोऽधः शिरा सुजला।**
**उदगर्जुनस्य दृश्यो वल्मीको यदि ततोऽर्जुनाद् हस्तैः।**
**त्रिभिरम्बु भवति पुरुषैस्त्रिभिरर्धसमन्वितैः पश्चात्।।**

**श्वेता गोधार्धनरे पुरुषे मृद्धूसरा ततः कृष्णा ।**
**पीता सिता ससिकता ततो जलं निर्दिशेदमिदमितम्।।१**

उक्तलक्षणे वल्मीको विमर्दितश्चेत् भवति तर्हि अर्जुनात् त्रिभिर्हस्तैः: दक्षिणेन । सपादद्विपुरुषाभ्याम् अशोष्यं स्वादु जलं भवति। अधपुरुषे रोहितमत्स्योऽर्धपुरुषे च कपिला पाण्डुरा मृत् सर्शकरा सिकता च प्राप्यते ततश्च जलं भवति-

**वल्मीकोपचितायां निर्गुण्ड्यां दक्षिणेन कथितकरैः।**
**पुरुषद्वये सपादे स्वादु जलं भवति चाशोष्यम्।।**
**रोहितमत्स्योऽर्धनरे मृत्कपिला पाण्डुरा ततः परतः।**
**सिकता सशर्कराऽथक्रमेण परतो भवत्यम्भः।।२**

बदरीवृक्षात् पूर्वेण वल्मीको भवेत् तर्हि त्रिभिः पुरुषैः जलं प्राप्यते। अर्धपुरुषे श्वेता गृहगोधिका दृश्यते-

**पूर्वेण यदि बदर्या वल्मीको दृश्यते जलं पश्चात्।**
**पुरुषैस्त्रिभिरादेश्यं श्वेता गृहगोधिकार्धनरे ।।३**

सारस्वते बदर्याः त्रिहज्ञतप्रमाणे जलदर्शनं लक्षणम् उक्तम्। अन्यबृहत्संहितावदेव । तत्रस्थजलस्य नैर्मल्यं विज्ञेयम्-

**पूर्वभागं बदर्याश्चेत् वल्मीको दृश्यते जलम्।**
**पश्चाद् हस्तत्रये वाच्यं खाते तु पुरुषत्रये।।**
**अधःखातेऽर्धपुरुषे दृश्यते गृहगोधिका ।**
**श्वेतवर्णा ततोऽधस्थं जलं भवति निर्मलम्।।४**

बदरीवृक्षः सपलाशो भवेत्तर्हि पश्चिमे सपादत्रिपुरुषैः जलं भवति। पुरुषे च टुण्डुभः (निर्विषः सर्पः) अधस्थस्य जलस्य लक्षणं भवति। उदुम्बरस्य पार्श्वे बिल्वं भवेत् तर्हि त्रिभिः पुरुषैः याम्या शिरा भवति अर्धपुरुषे च कृष्णो मण्डूको भवति। काकोदुम्बरिकायां चेत् वल्मीको दृश्यते, तर्हि सपादत्रिपुरुषैः पश्चिमस्था शिरा वहति। अर्धे पुरुषे पाण्डुरपीता मृद् गोरसवर्णसदृशः पाषाणः कुमुदसदृशो मूषकश्च प्राप्यते-

**सपलाशा बदरी चेद् दिश्यपरस्यां ततो जलं भवति।**
**पुरुषत्रये सपादे पुरुषेऽत्र च टुण्डुभश्चिन्हम्।।**
**बिल्वोदुम्बीयोगे विहाय हस्तत्रयं तु याम्येन ।**
**पुरुषैस्त्रिभिरम्बु भवेत् कृष्णोऽर्धनरे च मण्डूकः।।**
**काकोदुम्बरिकायां वल्मीको दृश्यते शिरा तस्मिन्।**
**पुरुषत्रये सपादे पश्चिमदिक्स्था वहति सा च।**
**अपाण्डुपीतिका मृद् गोरसवर्णश्च भवति पाषाणः।**
**पुरुषार्धे कुमुदनिभो दृष्टिपथे मूषको याति।।१**

निर्जले देशे कम्पिल्लवृक्षश्चेद्भवति, ततः हस्तत्रयेण प्राग्दिशि दक्षिणा शिरा वहति। प्रथमं नीला मृद् उत्पलवर्णः कपोतः हस्तप्रमाणेऽजगन्धको मत्स्यः भवेत् तत्र अल्परिमाणे क्षारं जलं भवति-

**जलपरिहीने देशे वृक्षः कम्पिल्लको यदा दृश्यः ।**
**प्राच्या हस्तत्रितये वहति शिरा दक्षिणा प्रथमम्।।**
**मृन्नीलोत्पलवर्णा कापोता दृश्यते ततस्तमिन्।**
**हस्तेऽजगन्धको मत्स्यकः पयोऽल्पं सक्षारकम्।।२**

एवं निर्जलप्रदेशे स्वयंरुहैः वृक्षैः विविधलक्षणयुक्तैः जलपरिमाणं प्रमाणं ज्ञेयम् ।

कम्पिल्लबिभीतकं कोविदारकरंचकदम्बतिलकतालनालिकेरकपित्थाश्मन्तकहरिदभांगीलक्ष्मणाभल्लतकां-कोलातिबलाऽऽम्रातकवरुणकपिण्डारपुरुषकादीनां वृक्षाणां लक्षणैः भूमिगतजलस्रोतसां परिज्ञानपिधिः बृहत्संहितायां वराहमिहिरेण सविस्तरम् व्याख्यातः। सामान्यतः सर्वतः सतृणायां भूमौ अतृणे, अतुणायां च सतृणे भूमौ जलशिरा धनं वा भवति इति ज्ञेयम्-

**अतृणे सतृणा यस्मिन् सतृणे तृणवर्जिता मही यत्र।**
**तस्मिन् शिरा प्रदिष्टा वक्तव्यं वा धनं चास्मिन्।।१**

उपलब्धवस्तुनः यथास्वरूपं सर्वथा प्ररक्षणं संरक्षणम् उच्यते। उपभोग्यप्राकृतिकसंसाधनानां निरन्तरम् उपभोगे तुषु सम्भाव्यमानायाः गुणात्मकपरिणात्मकक्षतेः संरक्षा प्रतिपूर्तिश्च संरक्षणस्य मुलमन्त्रं भवति। लोकप्रवाहे पूर्व-पूर्वमानवानां पश्चाज्जातान् मानवान् प्रति एतद् दायित्वं भवति, यत् ते साधानानि आवश्यकतानुसारम् उपभुज्य आगामिमनुष्याणामुपभोगाय त्यजन्तु। यतोहि प्रकृतिः सर्वेषामपि पृथिवीवासिनां सम्पत् भवति। अतः प्रकृते उपभोगः सह भावनया करणीयः। भारतीयचिन्तनस्य पृष्ठभूमिः 'संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्' इति विचारे निहिता अस्ति। केवलाघो भवति केवलादी इति वैदिकोद्घोषो वर्तते। ईशावास्योपनिषदि तु सर्वमपि जडचेतनम् ईशावास्यम् इति उद्घोष्य त्यागभावनया भोगस्योपदेशो विहितः।२ एवं लोभरहितभोगः उपभोग्यानां संरक्षणाय भवेत्।

जलसंरक्षणसंदर्भे चिन्तनीयम्, यत् प्रकृतेः अक्षयभण्डारः अपप्रयोगेण विरूपतां प्राप्तुं शक्तोति। अतः यथावश्यकं विवेकपूर्वकं संसाधनानां संदोहनम् उपभोगश्चापेक्षते । वर्तमानसमये निरंतरं वृद्धिमत्यां सत्यां विश्वजनसंख्यायां प्राकृतिकपदार्थानां संदोहनम् अपेक्षाकृतं बृहत्परिमाणे भवति। एकतः अत्यधिकोपभोगेन संसाधनेषु क्षरणं तीव्रगत्या जायते।

## Refereces


1. स्वामीविमलानन्दः महा०उप०, श्रीरामकृष्णमठ, मद्रास, १९७६
2. ऋग्वेदे १/३२/१
3. या आपो दिव्या उत वा स्रवंति। खनित्रिमा उत वा या स्वरूंजा।। ऋग्वेदे ७/४९/२
4. ऋग्वेदे १०/१०५/१७
5. ऋग्वेदे ३/४५/३
6. तदेव १०/९६/४
7. अथर्ववेदे ६/२२/१-२
8. अथर्ववेदे ३/१३/१, १९/२/२
9. अथर्व० १९/२/१-३, २०/८/४
10. मनुस्मृतौ ८/२४८
11. आपगाः कृतपुण्यास्ताः पद्मिन्यश्च सरांसि च। ऐषु यास्यति काकुत्स्थो विगाह्य सलिलं शुचि।। वा०रा० २/४८/६
12. मेघाः समुद्भूतसमुद्रनादा महाजलैर्घैर्गगनावलम्बाः।
13. नदीस्तटाकानि सरांसि वापीर्महीं च कृत्स्नामपवाहयन्ति।। वा०रा० २/४८/४४
14. अकर्दममिदं तीर्थं भरद्वाज निशामय। रमणीयं प्रसन्नम्बु सन्मनुष्यमनो यथा।। इदमेवावगाहिष्ये तमसातीर्थमुत्तमम्।। वा०रा० १/२/५-६
15. सोऽभिषेकं ततः कृत्वा तीर्थे तस्मिन् यथाविधि। तमेव चिन्तयन्नर्थमुपावर्तत वै मुनिः।। भरद्वाज............कलशं पूर्णमादाय पृष्ठतोऽनुजगाम ह।। तदेव १/२/२०-२१
16. पीतोदकांस्तोयपरिप्लुतांगानचारयद् वै तमसाविदूरे।। तदेव २/४५/३३
17. वा०रा० २/४६/१०
18. तस्मपत् सुस्राव सरसः सायोध्यामुपगूहते। सरः प्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता।। वा० रा १/२४/९
19. वा०रा० १/५/१७
20. रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत्। गृहाण वत्स सलिलं मा भूत कालस्य पर्ययः।। वा०रा० १/२२/२
21. जह्नवी सरितां श्रेष्ठां। तदेव १/३५/७, १/३५/२२
22. दिव्यां त्रिपथगां नदीम्। वा०रा० १/२३/५, १/३५/१७
23. तस्यां गंगेयमभवज्जयेष्ठा हिमवतः सुता । तदेव १/३५/१६
24. ते गत्वा........तदा। जाह्नवीं सरितां श्रेष्ठां ददृशुर्मुनिसेविताम्। ततः स्नात्वा यथान्यायं संतर्प्य पितृदेवताः।। वा०रा० १/३५/७-६
25. वा०रा० १/४२/१३-४३-११ यावत्
26. वा०रा० १/४३/२६-२९ वा०रा० १/४४/१-३ पितामहानां सर्वेषां त्वमत्र मनुजाधिप। कुरुष्व सलिलं राजन् प्रतिज्ञामपवर्जय।। वा०रा० १/४४/७
27. प्लावयस्व त्वमात्मानं नरोत्तम सदोचिते। सलिले पुरुषश्रेष्ठं शुचिः पुण्यफलो भव। तदेव १/४४/१४
28. तस्माज्जह्नुसुता गंगां प्रोच्यते जाह्नवीति च। तदेव १/४३/३६ गंगा त्रिपथगां दिव्या भागीरथीति च।। तदेव १/४४/६
29. तत्र त्रिपथगां दिव्यां शीलतोयामशैवलाम्।
ददर्श राघवो गंगां रम्यामृषिनिषेविताम्।। तदेव २/५०/१२
30. कालेऽप्सरयोभिर्हर्षाभिः सेविताम्भोह्दां शिवाम्।। तदेव २/५०/१३ वा०रा० २/५०/१४ तदेव २/५०/४८
31. गंगायमुनयोः संधौ प्रापतुर्निलयं मुनेः। वा०रा० २/५४/८ वा०रा० २/५५/१०-१३
32. कालिन्दीमध्यमायाता सीता त्वेनामवन्दत।
33. विचित्रवालुकजलां हंससारसनादिताम्। तदेव २/५५/३१
34. लता उथाय ते सर्वे स्पृष्ट्वा नद्याः शिवं जलम्।
पन्थानमृषिभिर्जुष्टं चित्रकूटस्य तं ययुः।। तदेव २/५६/४
35. सुमागधी नदी रम्यां मागधान् विश्रताऽऽययौ। पंचानां शैलमुख्यानां मध्ये मालेव शोभते।। सैषा हि मागधी राम वसोस्तस्य महात्मनः। पूर्वाभिचरिता राम सुक्षेत्रा सस्यमालिनी।। तदेव १/३२/९-१०
36. वा०रा० १/३५/४
37. वा०रा० २/९५/१, ३
38. जटाजिनधराः काले वल्कलोत्तरवाससः। ऋषयस्त्ववगाहन्ते नदीं मन्दाकिनीं प्रिये।। विधूतकल्मषैः सिद्धैस्तपोदमशमान्वितैः। नित्यविक्षोभितजलां विगाहस्व मया सह।। वा०रा० २/९५/६,१३
39. न सोऽस्ति यः स्यान्न गतकल्मः सुखी। तदेव २/९५/१८
40. प्रगृह्य तु महीपालो जलापूरितमंजलीम्। तदेव २/१०३/२६

41. वा०रा० २/१०४/५ यथाख्यातमगस्त्येन मुनिना भावितात्मना। इयं गोदावरी रम्या पुष्पितैस्तरुभिर्वृता।। हंसकारण्डवकीर्णा चक्रवाकोपशोभिता। नातिदूरे न चासन्ने मृगयूथनिपीडिता।। स गत्वा लक्ष्मणः श्रीमान् नदीं गोदावरीं तदा। स्नात्वा पद्मानि चादाय सफलः पुनरागतः।। वा०रा० ३/१५/१२,१३,२४
42. वा०रा० ३/१६/१,३,४१,४२
43. इक्षिमती नदीम्। तदेव १/७०/३
44. वेदश्रुति । तदेव २/४६/१०
45. गोमती । तदेव २/४६/११-१२
46. स्यन्दिका नदीम् । तदेव २/४६/१२
47. वा० रा० ४/२५/३७,५१
48. वा० रा० २/७१/१-१६, वा शैलोदा । देव ४/४६/३७
49. उपतप्तादका नद्यः । वा० रा० २/५६/५
50. सरितश्च । वा० रा० २/५७/४
51. ददर्श गिरिनद्यश्च विमलास्तत्र राघवः । वा० रा० ४/३३/८
52. नदीशतानां पंचानां जलं कुम्भैरुपाहरन् । तदेव ६/१२८/५३ अनेन चित्रणेन प्रतीयते तु् रामराज्येषु वा अन्येषु राज्येषु अनेका अभ्यषिंचन्नख्याग्र प्रसन्नेन सुगन्धिना। ..............यथ । तदेव ६/१२८/६१ पद्मपुराणे १३/३४/३५, श्रीमद्भावगते ५/१६/१६ तदेव ११३/३३ तदेव १२०/६
53. तदेव १२०/६
54. पद्मपुराणे १२०/७
55. तदेव १२० तमाऽध्यायः
56. ऋग्वेदे ३/३/३३/६
57. अथर्ववेदे २/३/४, ६/१००/२
58. तैत्तिरीयारण्यके ५/४
59. बृहत्संहितायाम् ५३/६-७
60. तदेव ५३/८
61. बृहतंहितायाम् ५३/६-१०
62. बृहत्संहितायाम् ५३/११-१३
63. तदेव ५३/१४-१५
64. तदेव ५३/१६
65. अन्यबृहत्संहितायाम् पृष्ठे २३२
66. बृहत्संहितायाम् ५३/१७-२०
67. तदेव ५३/२१-२२
68. बृहस्पतिसंहितायाम् ५३/५२
69. ईशावास्योपनिषदि १